इत्यमरकोषमेदिन्यौ । घृतं । इति हेमचन्द्रः । (युद्धार्थे यथा,—"आदरवती लोचनमार्गमाजौ रजोन्धकारस्य विजृम्भितस्य" । इति रघुः । ७ । ४२ ।) आक्षेपः । इति शब्दरत्नावली ॥

आजीवः, पुं, (आङ् + जीव + घञ् ।) जीविका । इत्यमरः ॥ ("बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे" ॥ इति रामायणे ।)

आजुः, [र्] स्त्री, (आङ् + जुर् + क्विप् ।) आजूः । विष्टिः । इति स्वामी ॥

आजूः, स्त्री, (आ + जुगतौ + क्विप् दीर्घश्च ।) वेतनं विना कर्म्मकारः । वेगार इति भाषा । इत्यमरः ॥ (यदुक्तम्, "हठादस्तितिकः क्लेशोविष्टिराजूश्च कीर्त्त्यते" ।)

आज्ञप्तः, त्रि, (आ + ज्ञा + णिच् + क्त ।) आज्ञाप्राप्तः । यथा, देवीमाहात्म्यम् ।
"आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः" ॥

आज्ञा, स्त्री, (आङ् + ज्ञा + अङ् + टाप् ।) आदेशः । तत्पर्य्यायः । अववादः २ निर्द्देशः ३ निदेशः ४ शासनं ५ शिष्टिः ६ । इत्यमरः ॥ ("तथेति शेषामिव भर्त्तुराज्ञां" । इति कुमारे । ३ । २२ ।
"पश्चात् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत्" इति रघौ । १२ । ७ ।)

आज्ञाकारी, [न्] त्रि, (आज्ञा + कृ + णिन् ।) आज्ञया कर्म्मकारी । आज्ञावहः । आज्ञानुवर्त्ती ॥

आज्ञाचक्रं, क्ली, षट्चक्रान्तर्गतषष्ठचक्रम् । तथा च तन्त्रे,—"आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यानधामप्रकाशं हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रं । तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता ॥ एतत् पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्" ॥ इति तत्त्वचिन्तामणौ षष्ठप्रकाशः ॥

आज्ञापकः, त्रि, (आङ् + ज्ञा + णिच् + ण्वुल् ।) आज्ञाकर्त्ता ।

आज्ञापत्रं, (आज्ञायै पत्रं ।) क्ली आदेशलिपिः । निदेशलिखनं । हुकुमनामा इति पारस्यभाषा ॥

आज्ञापनं, क्ली, (आङ् + ज्ञापि + ल्युट् ।) विज्ञापनं । जानान इति भाषा ॥

आज्ञप्तः, त्रि, (आङ् + ज्ञापि + क्त ।) आज्ञप्तिविशिष्टः । लब्धाज्ञः । आज्ञाप्राप्तः ॥

आज्यं, क्ली, (आङ् पूर्व्वात् अञ्जेः संज्ञायामिति क्यप् ।) घृतं । इत्यमरः ॥ श्रीवासः । इत्यजयपालः ॥ (यागक्रियासाधनं तैलदुग्धादिकमपि आज्यशब्देनोच्यते । यदुक्तं स्मृतिसङ्ग्रहे ।
"घृतं वा यदि वा तैलं पयो वा दधि यावकं ।
आज्यस्थाने नियुक्तानामाज्यशब्दो विधीयते" ॥
यथा रघुवंशे । ७।२० । "तत्रार्च्चितो भोजपतेः पुरोधाः हुत्वाग्निमाज्यादिभिरग्निकल्पः" ॥)

आज्यभागः, पुं, (आज्यस्य भागः) ऋग्वेदिनां अग्नेरुत्तरभागे स्वैवाग्निसम्प्रदानकघृताहुतिः तद्दक्षिणभागे सोमसम्प्रदानकाहुतिश्च । इति कालेसिः ।
यजुर्वेदिनान्तु अग्नेरुत्तरदक्षिणयोः पश्चिमादिप्राच्यन्तघृतधारा । इति पशुपतिः ॥

आञ्जनेयः, पुं, (अञ्जनाया अपत्यं, अञ्जना + ढक् ।) अञ्जनानामवानरीपुत्रः । स तु हनूमान् । इति त्रिकाण्डशेषः ॥ (यथा महानाटके ।
"उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयं" ॥)

आञ्जिनेयः, पुं, (आञ्जन + ढक् + इट् ।) जन्तुविशेषः । आजनाइ इति ख्यातः । इति शब्दमाला ॥

आटिः, पुं, (आङ् + अट + इन् ।) पक्षिविशेषः । शरालि इति ख्यातः । इत्यमरः ॥

आटीकनं, क्ली, (आङ् + टीक् + ल्युट् ।) वत्सानां गमनं । इति त्रिकाण्डशेषः ॥

आटीकरः, पुं, (आटीक + र ।) वृषः । इति भूरिप्रयोगः ॥

आटोपः, पुं, (आङ् + टुप् + घञ् ।) दर्पः । इति हेमचन्द्रः ॥ वायुजन्य-उदरगुड़गुड़ाशब्दः । इति वैद्यकं ॥ (गर्व्वः, सम्भ्रमः, संरम्भः । यथा-पञ्चतन्त्रे "विषं भवतु मावाभूत् फटाटोपो भयङ्करः" । यथा शिशुपालबधे । 'साटोपमुर्व्वीमनिशं नदन्तः' ।
"आटोपहृल्लासवमीगुरुत्व-
स्तैमित्यमावाहकफप्रसेकैः" ।
इति माधवकरः ॥)

आडम्बरः, पुं, (आङ् + दम् + वरच् । ततः द स्थाने ड । आडम्ब्यते हवि क्षेपे घञ् भावे वा । आडम्बं राति रमयति वा आतोनुपेति कः । मूलविभुजेति वा कः । आडम्बयति वा बाहुलकादरन् ।) पटहः । तूर्य्यरवः । गजेन्द्रगर्ज्जनं । इत्यमरः ॥ आरम्भः । इति त्रिकाण्डशेषः ॥ पक्ष । दर्पः । इति मेदिनी ॥ क्रोधः । इति स्वामी ॥ हर्षः । इति शब्दरत्नावली ॥ (आयोजनं । एकत्र सन्निवेशः, यथा, भामिनीविलासे । "धातः किं नु विधौ विधातुमुचितो धाराधराडम्बरः" ॥ युद्धं । रवार्थे यथा,
"असारस्य पदार्थस्य प्रायेणाडम्बरो महान् ।
नहि तादृक्ध्वनिः स्वर्णे यथा कांस्ये प्रजायते" ॥)

आडिः, स्त्री, (आङ् + अड़ + इन् ।) शरालिपक्षी । इत्यमरः ॥ स्वनामख्यातमत्स्यविशेषः । अस्याः गुणाः । गुरुत्वं । स्निग्धत्वं । वातश्लेष्मप्रकोपनत्वं । अतिबलशुक्रमेधाभिवृद्धिकारित्वञ्च ॥ इति राजवल्लभः ॥ (विश्वामित्रशापेन वशिष्ठो महर्षिराड़िपक्षिरूपतां गतः इति पौराणिकी कथा ॥ यथा मार्कण्डेयपुराणे आड़िवकयुद्धे,—
"श्रुत्वा शापं महातेजा विश्वामित्रोऽपि कौशिकः ।
त्वमप्याड़िर्भवस्वेति प्रतिशापमयच्छत ॥
आड़िं सोऽप्युन्नतग्रीवो वकः पक्षामताड़यत्" ॥)

आडूः, पुं, (अड शब्दे । अनोडश्चेत्युः ।) उडुपः । भेला माड इत्यादि भाषा । इत्युणादिकोषः ।

आढ़कं, क्ली, (आ समन्तात् ढौकते ढौक्यते वा ढौक गतौ अच् घञ् वा पृषोदरादिः । परिमाणविशेषः । आढ़ा इति भाषा । यथा,—
"शतयोजनविस्तीर्णं त्रिंशद्योजनमायतं ।
आढ़कस्य भवेन्मानं मुनिभिः परिकीर्त्तितं" ॥
अपि च ॥
"त्रिंशद्योजनविस्तीर्णं शतयोजनमायतं ।
विंशयोजनगम्भीरमाढ़कं परिकीर्त्तितं" ॥
इति गणपतिभट्टः । इति ज्योतिस्तत्त्वं ॥

आढ़कः, पुं, क्ली, चतुःप्रस्थपरिमाणं । आड़ी इति भाषा । इत्यमरः ॥ द्रोणचतुर्थभागः । इति लीलावती ॥ अष्टमुष्टिर्भवेत् कुञ्चिरित्यादिवचनात् षट्पञ्चाशदधिकद्विशतमुष्टिर्भवति । व्यवहारे षोड़शसेरो विंशतिसेरो वा । वैद्यकमते अष्टशरावपरिमाणं । तत्पर्य्यायः । पात्रं २ कंसं ३ भाजनं ४ । इति परिभाषा ॥
("चतुःप्रस्थैस्तथाढ़कं ।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलञ्च तत्" ॥
इति शार्ङ्गधरः ।
"चतुःप्रस्थमथाढ़कं ।
"पात्रं तदेव विज्ञेयं कंसंप्रस्थाष्टकन्तथा" ॥
इति चरकः ।)
अपचयविवक्षायां आढ़किकेत्यपि स्यात् । इत्यमरटीकासारसुन्दरी ॥ आढ़िका । इति भरतः ॥

आढ़किकः, त्रि, (आढ़क + ठञ् ।) आढ़कपरिमितवीजवपनादियोग्यक्षेत्रादिः । इत्यमरः ॥

आढ़की, स्त्री, शमीधान्यविशेषः । अरहर इति भाषा । तत्पर्य्यायः । तुवरी २ वर्य्या ३ करवीरभुजा ४ वृत्तवीजा ५ पीतपुष्पा ६ । अस्याः गुणाः । कषायत्वं । मधुरत्वं । कफपित्तनाशित्वञ्च । तद्विदलगुणाः । ईषद्वातरुचिकारित्वं । गुरुत्वं । ग्राहित्वञ्च । पीता रक्ता सिता त्रिविधेयं । श्वेता दोषदा । लोहिता रुच्या बल्या पित्ततापादिहन्त्री च । पीता दीपनी पित्तदाहध्वंसिनी च ॥ तद्यूषं बल्यं । इति राजनिर्घण्टः ॥ अमरमते तत्पर्य्यायः । काक्षी २ मृतत्स्ना ३ तुवरिका ४ मृतालकं ५ सुराष्ट्रजं ६ । भरतमल्लिकमते एतत् षट्कं अरहरस्य । सारसुन्दरीमते तुवरिकाख्यगन्धद्रव्यस्य । केषाञ्चिन्मते सुगन्धिमृत्तिकायाः ॥ (अस्याः पर्य्यायगुणावाह ।
"आढ़की तुवरी चापि सा प्रोक्ता शणपुष्पिका ॥
आढ़की तुवरा रूक्षा मधरा शीतला लघुः ।
ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्" ॥
इति भावप्रकाशः ॥
"मृदुः कषाया च सरक्तपित्तं
निहन्ति कासानतिवातला स्यात् ।
गुल्मज्वरारोचककासछर्द्दि-
हृद्रोगदुर्नामहराढ़की स्यात्" ॥
इति हारीतः ॥
"आढ़की कफपित्तघ्नी वातला," । इति चरकः ॥
"आढ़की कफपित्तघ्नी नातिवातप्रकोपनी" ।
इति सुश्रुतः ॥)